दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लप्रतिपदा
चैत्र 05 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-146 | 1 | मार्च 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन हिमाचल-संस्कृत-अकादम्याः 'भारतीय-संस्कृति-पञ्चाङ्गस्य' विमोचनं कृत

3 आईआईटी बॉम्बे (IIT Bombay) संस्थाने 'ऋतम् २०२६' इति संस्कृतमहोत्सवः

6 कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः दीक्षान्त-समारोहः सम्पन्नः

## लोकसभया एकं राष्ट्र एकं निर्वाचनम् इत्याख्ये विधेयके परीक्षण-रतायाः संयुक्त-संसदीय-समित्याः कार्यकालं विस्तारितम्

**हिमसंस्कृतवार्ताः** - लोकसभया एकं राष्ट्र एकं निर्वाचनम् इत्याख्ये विधेयके परीक्षण-रतायाः संयुक्त-संसदीय-समित्याः कार्यकालम् षड्विंशत्यधिक-द्विसहस्रतम-वर्षाकालीन-सत्रस्य अन्तिम-सप्ताहस्य प्रथम-दिवसं यावत् विस्तारितम्। अस्य विधेयकस्य मुख्य लक्ष्यं लोकसभा-राज्यसभा-विधानासभानाञ्च निर्वाचनं युगपदेव सम्पद्येत इत्यस्ति । समित्याः अध्यक्षः पी.पी. चौधरी इत्येषः संविधान-विधेयकं चतुर्विंशत्यधिक-द्विसहस्रतमं तथा च केन्द्रशासित-प्रदेश-विधि-विधेयकं चतुर्विंशत्यधिक-द्विसहस्रतमं इति विषययोः संयुक्त-समित्याः कालावधि-विस्तारस्य प्रस्तावं प्रस्तुतवान्। सदने ध्वनि-मतेन एतस्मै प्रस्तावाय सहमतिः प्रदत्ता ।

## यात्रिभ्यः उचित-सौलभ्यप्रदानाय विमानस्य आसन-चयने न्यूनतम् षष्टि-प्रतिशतं आसनानि निःशुल्कं प्रापयेयुः - नागरिकोड्डयन-मन्त्रालयः

**हिमसंस्कृतवार्ताः** - सर्वकारेण विमान-संस्थाः आदिष्टाः यत् यात्रिभ्यः उचित-सौलभ्यप्रदानाय विमानस्य आसन-चयने न्यूनतम् षष्टि-प्रतिशतं आसनानि निःशुल्कं प्रापयेयुः । नागरिकोड्डयन-मन्त्रालयेन नागरिकोड्डयन-महानिदेशालयस्य माध्यमेन यात्रिणाम् सौलभ्यं, पारदर्शितां तथा च सर्वासु विमान-संस्थासु समान-कार्यप्रणालीं सुदृढीकर्तुं नूतनाः निर्देशाः निस्सारिताः। मन्त्रालयेन निर्दिष्टं यत् एकेनैव पी. एन. आर. इति क्रमेण यात्रां कुर्वन्तः यात्रिणः एकत्रैव उपावेशनीयाः, यथासम्भवं च तेभ्यः समीपस्थ-आसनानि प्रदातव्यानि। तत्र सूचितं यत् क्रीडा-सामग्र्याः वाद्य-यन्त्राणां च परिवहन सुविधा पारदर्शितया यात्रानुकूल-रीत्या च प्रदातव्या। विमान-संस्थाभ्यः पालित-पशूनां वहन-विषये अपि स्पष्टाः नीतिनिर्माणार्थं निर्देशाः दत्ताः। सर्वकारेण यात्रिणाम् अधिकारैः सह सम्बद्धानां नियमानां कठोरतया पालनाय अपि आदिष्टम् ।

## संसदीय-लोकतन्त्रे राज्यसभायाः सदस्यानां योगदानं सदैव स्मरणीयम् भविष्यति सहैव राजनीति-क्षेत्रे कदापि 'पूर्णविरामः' न भवति - प्रधानमन्त्री नरेन्द्रमोदी



**हिमसंस्कृतवार्ताः** - राज्यसभायां विंशतिः राज्यानां नवपञ्चाशत् सदस्यानां सौप्रस्थानिकसमारोहः आसीत्। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी न्यगादीत् यत् संसदीय लोकतन्त्रे एतेषां योगदानं सदैव स्मरणीयम् भविष्यति सहैव राजनीति-क्षेत्रे कदापि 'पूर्णविरामः' न भवति, यतः एतेषाम् अनुभवः राष्ट्राय सदैव प्रासङ्गिको वर्तते। प्रधानमन्त्रिणा अवलोकितं यत् सौप्रस्थानिक समारोहे सर्वे सदस्याः दलीय राजनीतितः पृथक् भूत्वा एकां समानां भावनां प्रदर्शयन्ति। निवर्तमानं उपसभापतिं हरिवंश-महोदयम् उद्दिश्य मोदी-महोदयः अवदत् यत् तेन दीर्घकालं यावत् सदनस्य उत्तरदायित्वं कुशलतापूर्वकं निर्व्यूढम्। इतः प्राक् सदनस्य सभापतिः सी. पी. राधाकृष्णन् महोदयः अवदत् यत् प्रति वर्षद्वये तृतीयांश-सदस्यानां निवृत्तिः राज्यसभायाः घटनात्मक स्थैर्यं रक्षति, येन नूतन-सदस्यानां कृते मार्गः प्रशस्तः भवति। विपक्षस्य नेता मल्लिकार्जुन खड़गे महोदयः स्ववक्तव्ये अवदत् यत् ये राजनीति-क्षेत्रे सार्वजनिक-जीवने च सन्ति, ते देशसेवया कदापि श्रान्ताः भवन्ति न च निवृत्ताः ।

## 'वन्देभारतम्' रेलयानानि यात्रिकाणां सुरक्षां वर्धयितुं बहुभिः उन्नत-सुरक्षा-वैशिष्ट्यैः युक्तानि सन्ति- रेलमन्त्री



**हिमसंस्कृतवार्ताः** - रेलमन्त्री अश्विनी वैष्णवः अवोचत् यत् **'वन्देभारतम्'** रेलयानानि यात्रिकाणां सुरक्षां वर्धयितुं बहुभिः उन्नत-सुरक्षा-वैशिष्ट्यैः युक्तानि सन्ति। लोकसभायां प्रश्नकाल-समये अनुपूरक-प्रश्नानाम् उत्तरं यच्छन् सः अवदत् यत् वन्देभारत एक्सप्रेस-याने विशेषतः 'एण्टी-क्लाइम्बिंग' इत्यस्य तन्त्रस्य प्रयोगः कृतः । एतस्य तन्त्रस्य मुख्यम् उद्देश्यं दुर्घटनायाः समये रेलकक्षः परस्परं उपरि आरोहणं रोद्धं तथा च यात्रीणां जीवनं रक्षितुम् अस्ति। मन्त्रिणा बलपूर्वकं उक्तं यत् सर्वकारः रेलयात्रां सुरक्षिततरां कर्तुं कटिबद्धो वर्तते।

## मुन्द्रा-पोताश्रये 'जग लाड़की' इति पोतस्य आगमनम्



**हिमसंस्कृतवार्ताः** - गुजरात-राज्यस्य मुन्द्रा-पोताश्रये 'जग लाड़की' इति नामकः विशालः भारतीय-पोतः खनिजतैलस्य महत्-परिमाणं नीत्वा प्राप्तवान्। एषः पोतः संयुक्त-अरब-अमीरात-देशात् प्रायः अष्ट-सहस्र-मीट्रिक टन परिमितं उच्चगुणवत्तायुक्तं खनिजतैलं आनयति। अस्मात् पूर्व 'शिवालिक' इति पोतः मुन्द्रा नगरे तथा 'नन्दादेवी' इति पोतः वाडिनार-पोताश्रये अपि प्राप्तवन्तौ। पोत-अधिकारिणः तैल-निक्षेपणस्य कार्यं सुचारुरूपेण प्रचालयन्ति येन देशस्य परिष्करणशालासु तैल-वितरणं शीघ्रं भवेत्।

## बैडमिण्टन-प्रतिस्पर्धा

फ्रान्स-देशस्य 'पालेस-डेस्-स्पोर्ट्स' क्रीडाङ्गणे 'ओर्लिस् मास्टर्स' बैडमिण्टन्-प्रतिस्पर्धायां पुरुष-एकल-वर्गे आयुष-शेट्टी, किरण-जॉर्ज इत्येन पराजित्य षोडशेचक्रे प्रविष्टवान्। अस्मात् पूर्वं अन्यस्मिन् द्वन्द्वे भारतस्य वरिष्ठ-क्रीडकः किदाम्बी श्रीकान्तः डेनमार्क-देशस्य मैग्नस जोहानेसन इत्यस्य विरुद्धं द्वादश एकविंशतिः, दश-एकविंशतिः इति अंकैः पराजितः जातः।

## नवरात्रिविशेषः
## प्रथमं शैलपुत्री



**वन्देवाञ्छितलाभाय-चन्द्रार्धकृतशेखराम्।**
**वृषारूढांशूलधरां-शैलपुत्रींयशस्विनीम्॥**

मैं मनचाहे फल (मनोकामना पूर्ति) की प्राप्ति के लिए वन्दना करता हूँ। जिनके मस्तक पर आधे चन्द्रमा का आभूषण सुशोभित है। जो वृषभ (बैल) की सवारी करती हैं।जो अपने हाथ में त्रिशूल धारण करती हैं।ऐसी यशस्विनी पर्वतराज हिमालय की पुत्री माँ शैलपुत्री को मैं नमन करता हूँ।

**"ॐ देवी शैलपुत्र्यै नमः॥"**

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केताः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन हिमाचल-संस्कृत-अकादम्याः 'भारतीय-संस्कृति-पञ्चाङ्गस्य' विमोचनं कृतम्




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दर-सिंह-सुक्खू-महोदयः हिमाचल-संस्कृत-अकादम्याः भारतीय-संस्कृति-आधारितस्य 'वार्षिक-पञ्चाङ्गस्य (केलेण्डर-२०२६)' विधिवत् विमोचनम् अकरोत्। अस्मिन् गरिमामय-अवसरे शिक्षा-मन्त्री रोहित-ठाकुरः, शिक्षा-सचिवः राकेश-कँवरः तथा च उच्चतर-शिक्षा-निदेशकः डॉ. अमरजीत-शर्मा अपि विशेषरूपेण उपस्थिताः आसन्।

## भारतीय-संस्कृतेः पञ्चाङ्गस्य च महत्त्वम्

पञ्चाङ्गस्य विमोचनं कुर्वन् मुख्यमन्त्री अवदत् यत् इदं पञ्चाङ्गं केवलं दिनाङ्कानां सङ्ग्रहः नास्ति, अपितु अस्माकं गौरवशालिन्याः भारतीय-संस्कृतेः वैदिक-ज्ञानस्य च दर्पणं वर्तते। मुख्यमन्त्रिणा स्वकीये सम्बोधने कथितम् यत् "अस्माकं नूतन-सन्ततीनां स्वकीय-मूलैः सह योजनार्थं संस्कृतस्य भारतीय-पञ्चाङ्गस्य च ज्ञानं अनिवार्यं वर्तते। इदं पञ्चाङ्गं अस्माकं पारम्परिक-उत्सवानां, शुभ-मुहूर्तानां तथा ऋतुचर्यायाः वैज्ञानिकीं सूचनां प्रददाति, या आधुनिक-जीवनशैल्यां मानसिक-शान्तये अनुशासनाय च आवश्यकी अस्ति।" सः अकथयत् यत् हिमाचलप्रदेशः 'देवभूमिः' अस्ति, संस्कृतं च अत्र द्वितीया राजभाषा वर्तते। संस्कृत-अकादम्याः ईदृशः शोधपरक-पञ्चाङ्ग-प्रकाशनस्य प्रयासः संस्कृत-भाषायाः प्रचाराय अत्यन्तं फलदायकः भविष्यति। मुख्यमन्त्री विश्वासं प्रकटितवान् यत् अस्य पञ्चाङ्गस्य माध्यमेन सामान्य-जनमानस-पर्यन्तं भारतीय-दर्शनस्य नैतिक-मूल्यानां च सन्देशः प्राप्स्यति, येन समाजे सकारात्मकतायाः सञ्चारः भविष्यति। अस्मिन् अवसरे शिक्षा-मन्त्री रोहित-ठाकुरः अकादम्याः कार्यस्य भूरि-भूरि प्रशंसां कृतवान्। सः अवदत् यत् शिक्षण-संस्थासु अपि भारतीय-ज्ञान-परम्परायाः प्रवर्धनाय सर्वकारः कटिबद्धः अस्ति। हिमाचल-संस्कृत-अकादम्याः सचिवेन मुख्यमन्त्री पञ्चाङ्गस्य विशेषताभिः अवगतः कारितः।

# HP WEATHER - हिमाचलप्रदेशे पुनः ऋतुपरिवर्तनम्; अटल-कन्दरासहितेषु उच्चक्षेत्रेषु हिमपातः, शिमलायां वृष्टिः



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे ऋतुना पुनः स्वरूपं परिवर्तितम्। राज्यस्य उच्चपर्वतीयक्षेत्रेषु प्रातःकालात् रविश्राम्य विश्राम्य हिमपातः प्रचलति, यदा तु शिमलासहितेषु अन्यभागेषु वृष्टिः अङ्किता। एकदिनं यावत् आकाशस्य स्वच्छतापश्चात् बुधवासरे प्रातःकालात् रोहताङ्ग-दर्रा, बारालाचा, शिङ्कुला तथा कुञ्जम-दर्रा इत्येतेषु हिमपातः प्रचलति। अपराह्णानन्तरं अटल-कन्दरायाः समीपे कोकसर, घेपन-पीक, बृहत्-लघु-शिगरी-हिमनद (Glacier) तथा चन्द्रा-उपत्यकायां हिमपातेन शैत्यं वर्धितम्।
अटल-कन्दरायाम्, रोहताङ्गे धुन्धी-क्षेत्रे च हिमपातेन आरक्षकविभागेन (Police) वाहनानां गमनागमनं स्थगितम्। मनाली-नगरस्य डीएसपी (DSP) के.डी. शर्मा महोदयः अवदत् यत् प्रचण्ड-हिमपातकारणात् केवलं आपत्काले एव 'फोर-बाई-फोर' (4x4) वाहनानि लाहौल-क्षेत्रं प्रति प्रेष्यन्ते। किन्नौर-जनपदस्य छितकुल-क्षेत्रे, श्रीखण्ड-पर्वतेषु तथा जलोड़ी-जोत इत्यादिषु उच्चस्थानेषु अपि अल्प-हिमपातः जातः।

## कति दिनानि यावत् भविष्यति वृष्टिः?

केषुचित् जनपदेषु 'ऑरेंज अलर्ट'
ऋतुविज्ञानकेन्द्रस्य (शिमला) अनुसारं १८, १९ तथा २० मार्च दिनाङ्केषु राज्यस्य बहुषु स्थानेषु अल्प-मध्यम-वृष्टेः हिमपातस्य च प्रबला सम्भावना वर्तते। १९ तथा २० मार्च दिनाङ्केषु चम्बा, काङ्गड़ा, कुल्लू, मण्डी, शिमला तथा लाहौल-स्पीति जनपदेषु 'नारङ्गवर्णीयसचेतना' (Orange Alert) प्रसारिता। अन्यजनपदेभ्यः 'येलो अलर्ट' अस्ति। अस्मिन् समये ४०-५० किलोमीटर् प्रतिघण्टा वेगेन चण्डवातः (अन्धड़) करकापातः (ओलावृष्टि) च भवितुं शक्नोति। २१ तः २४ मार्च पर्यन्तं ऋतुः किञ्चित् सामान्यः भविष्यति।

## तापमाने न्यूनतायाः सम्भावना

आगामि-दिनत्रये राज्यस्य बहुषु भागेषु न्यूनतम-तापमाने ३ तः ५ डिग्री सेल्सियस पर्यन्तं तथा अधिकतम-तापमाने ६ तः ८ डिग्री सेल्सियस पर्यन्तं न्यूनता आगमिष्यति। तदनन्तरं द्वयोः दिनयोः पुनः तापमाने ४ तः ६ डिग्री सेल्सियस पर्यन्तं वृद्धिः भवितुं शक्नोति।

# कर्मचारी-पैंशनधारिणां विषयान् लक्ष्यीकरिष्यति भाजपा, सत्रात् पूर्वं प्रतिपक्षनेतृणा आयोजिता भाजपा- विधायकदलस्य सभा



**हिमसंस्कृतवार्ताः:- शिमला।** भाजपा-विधायकदलस्य एका महत्त्वपूर्णा गोष्ठी मङ्गलवासरे शिमलायाः 'विली पार्क' इत्यत्र आयोजिता। अस्याः गोष्ठ्याः अध्यक्षता प्रतिपक्षनेता जयरामठाकुर-महोदयः अकरोत्। उपवेशने प्रदेशस्य वर्तमान-काङ्ग्रेस-सर्वकारस्य नीतिषु, प्रशासनिक-विफलतासु, जनविरोधि- निर्णयेषु च तीक्ष्णा चर्चा अभवत् तथा च आगामि-विधानसभा-सत्रे सर्वकारं दृढतया रोद्धुं रणनीतिः सज्जीकृता। गोष्ठ्यां विधायकाः अवदन् यत् प्रदेशे विधि-व्यवस्थायाः स्थितिः निरन्तरं बिभ्यति, विकासकार्याणि अवरुद्धानि सन्ति, काङ्ग्रेससर्वकारः च केवलं घोषणासु एव सीमितः अभवत्। कर्मचारिणाम्, पैंशनधारिणां, कृषकाणां, फल- उत्पादकानाम्, अनुद्योगि-यूनां च कृते कृताः प्रतिश्रुतयः (Promises) न पूरिताः, येन प्रदेशस्य जनता निराशा त्रस्ता च वर्तते। भाजपा- विधायकदलेन निर्णयः स्वीकृतः यत् एते सर्वे विषयाः विधानसभायाः अन्तः बहिः च पूर्णशक्त्या उत्थापयिष्यन्ते।
प्रतिपक्षनेता जयरामठाकुरः अवदत् यत् काङ्ग्रेससर्वकारः स्वप्रतिज्ञाः पालयितुं पूर्णतया विफलः अभवत्, प्रदेशे च कुशासनस्य वातावरणं निर्मितम्। भाजपा-विधायकदलं जनतायाः स्वरं भूत्वा सदनस्य अन्तः सर्वकारात् उत्तरं प्रक्ष्यति, प्रदेशस्य हितसम्बद्धेषु सर्वेषु विषयेषु सर्वकारं संलक्ष्य स्थापयिष्यति। अस्यां गोष्ठ्यां भाजपा-विधायकदलस्य सदस्याः विपिनपरमारः, सतपालसत्ती, रणधीरशर्मा, अनिलशर्मा, सुधीरशर्मा, सुखरामचौधरी, बिक्रमठाकुरः, राकेशजम्वालः, बलबीरवर्मा, डी. एस. ठाकुरः, जीतरामकटवालः, इन्द्रदत्त लखनपालः, सुरिन्दरशौरी, आशीषशर्मा, डॉ. जनकराजः, विनोदकुमारः, इन्द्रसिंहगान्धी, लोकेन्द्रकुमारः, रीनाकश्यपः, पूर्णचन्दः, दिलीपठाकुरः, प्रकाशराणा, रणवीरनिक्का च उपस्थिताः आसन्। गोष्ठ्यां एतदपि निश्चितं यत् जनतायाः कष्टान् संलक्ष्य भाजपा पूर्णप्रदेशे 'जनजागरण-अभियानम्' चालयिष्यति, सर्वकारस्य विफलताः च जनानां पुरतः प्रकटयिष्यति।

# ॥ विक्रम संवत् २०८३: नूतन-वर्षफलम् एवं ज्योतिषीय-महत्त्वम् ॥

चैत्रशुक्लप्रतिपदायां भारतीय-कालगणनानुसारं नूतन-संवत्सरस्य आरम्भः भवति। अस्मिन् वर्षे वयं 'विक्रम संवत् २०८३' इत्यस्मिन् प्रवेशं कुर्मः। एषः कालः न केवलं ऋतुपरिवर्तनस्य सूचकः, अपि तु आध्यात्मिक-शक्ति-जागरणस्य अपि पर्व अस्ति।
**अस्य वर्षस्य ग्रह-मण्डलम्:** ज्योतिषशास्त्रानुसारं प्रत्येकं वर्षस्य कश्चन राजा कश्चन च मन्त्री भवति। अस्य वर्षस्य गणना इत्थम् अस्ति: **वर्षस्य राजा मङ्गलः-:** सूर्यस्य मेष-सङ्क्रान्तिः भौमवासरे (१४ अप्रैल २०२६) भविष्यति। मङ्गलस्य राजत्वे देशस्य सैन्यशक्तिः वर्धिष्यते, साहसिक-कार्याणि सिद्धानि भविष्यन्ति, परन्तु भूकम्प-अग्निभयादीनां सम्भावना अपि वर्तते।

# आईआईटी बॉम्बे (IIT Bombay) संस्थाने 'ऋतम् २०२६' इति संस्कृतमहोत्सवः









**हिमसंस्कृतवार्ताः।** आईआईटी बॉम्बे (IIT Bombay) इति संस्थायाः सेंटर फॉर संस्कृत लर्निंग (Centre for Sanskrit Learning – CSL) इति विभागेन ८ मार्च २०२६ दिनाङ्के वार्षिकः संस्कृतमहोत्सवः "ऋतम् २०२६" इति सफलतया आयोजितः। अस्मिन् महोत्सवे देशस्य २१ विभिन्ननगरेभ्यः आगताः संस्कृतप्रेमिणः, विद्यार्थिनः, विद्वांसश्च उत्साहेन सहभागित्वं कृतवन्तः।

कार्यक्रमस्य विवरणम्

**प्रारम्भः-:** कार्यक्रमस्य आरम्भः पञ्जीकरणेन (Registration) इति, किट्-वितरणेन (Kit distribution) इति तथा ग्रन्थ-प्रदर्शन (Stall) इति दर्शनैः अभवत्। ततः दीपप्रज्वलनं, वेदमन्त्रोच्चारणं च कृत्वा औपचारिकं उद्घाटनम् अभवत्।

**उपस्थितिः-:** अस्मिन् अवसरे सु.श्री. आमी गणात्रा, श्रीमान् नारायणदत्तमिश्रः, प्रो. गणेश रामकृष्णन्, प्रो. नीरज कुम्भकर्णः, प्रो. जयदीप जोशी, डॉ. ए.एस. प्रसाद, श्रीमान् हरिकुमार मेनन्, तथा आईआईटी बॉम्बे (IITB) इति संस्थायाः कुलसचिवः (Registrar) इति डॉ. गणेश भोरकाडे महोदयाः उपस्थिताः आसन्।

**विशेषविमोचनम्-:** उद्घाटन-सत्रे सेंटर फॉर संस्कृत लर्निंग (CSL) इति संस्थायाः नूतन-लोगो (Logo) इति विमोचनं कृतम्। अस्मिन् एव सत्रे लेखिकायाः आमी गणात्रा महोदयायाः तथा विदुषः श्रीहरि गोकर्णकरस्य ग्रन्थयोः विमोचनम् अभवत्। तदनन्तरं एसपी संस्कृत स्टूडियो (SP Sanskrit Studio) इति संस्थायाः आधिकारिक-टी-शर्ट् (T-shirt) इति वस्त्राणां विमोचनमपि कृतम्।

## सांस्कृतिक-सत्राणि

**१. प्रश्नोत्तरी-:** इण्डियात्रा (INDI YATRA) इति संस्थया संस्कृत-प्रश्नोत्तरी-कार्यक्रमः आयोजितः।

**२. प्रस्तुतयः-:** पृषा ठक्कर तथा ईशान गोडसे इत्येताभ्यां संस्कृत-भारुड-प्रस्तुतिः कृता। द्वितीयसत्रे नारायणदत्तमिश्रस्य व्याख्यानं तथा नन्दा ठक्कर महोदयया सह बालकानां भगवद्गीता-अन्ताक्षरी कार्यक्रमः जातः।

**३. सम्मानः-:** कार्यक्रमस्य मध्ये सेंटर फॉर संस्कृत लर्निंग (CSL) इति संस्थायाः छात्राणां तथा कार्यकर्तृणां (Volunteers) सम्मानः कृतः।

**४. कला-प्रदर्शनम्-:** सायंकाले "धन्यो गृहस्थाश्रमः" इति नाटकं, आसावरी फडके महोदयायाः नृत्यं, ज्ञानकुल-गुरुकुलस्य छात्राणां गायनं तथा श्रीहरि-महोदयस्य सङ्गीत-प्रस्तुतिः अभवत्।

**"सहस्रमुखेषु संस्कृतम्"** इति आन्दोलनम् अयं महोत्सवः "सहस्रमुखेषु संस्कृतम्" इति आन्दोलनस्य एकः प्रमुखः उपक्रमः आसीत्।

**लक्ष्यम्-:** अस्य आरम्भः २०२२ तमे वर्षे अभवत्। अस्य मुख्योद्देशः संस्कृतभाषां केवलं पुस्तकेभ्यः बहिः आनीय लोकजीवनस्य भाषां निर्माणं वर्तते।

**व्याप्तिः-:** अस्य माध्यमेन विविधाः पाठ्यक्रमाः (Courses) इति, सांस्कृतिककार्यक्रमाः च आयोज्यन्ते। वर्तमानकाले १५०० तः अधिकाः जनाः अस्मिन् आन्दोलने संलग्नाः सन्ति, ये संस्कृतस्य पुनरुत्थाने योगदानं ददति।

# चैत्र नवरात्र : घटस्थापनस्य शुभकालः महत्त्वम्- डॉ परशुरामतिवारी




**हिमसंस्कृतवार्ताः-** नवरात्रिपूजायाः सर्वाधिकमहत्त्वपूर्णं भागं नवरात्रस्य प्रथमदिने घटस्थानपना अथवा कलशस्थानम् क्रियते। कलशस्थापनं चैत्रनवरात्रिस्य प्रथमदिने मार्चमासस्य १९ दिनाङ्के भविष्यति। प्रातःकाले कलशस्थापनस्य शुभसमयः प्रातः ६:५२ वादनतः प्रातः ७:४३ वादनपर्यन्तं भवति। अस्मिन् समये कलशस्थापनस्य शुभसमयः ५० निमेषाः भविष्यति। तदनन्तरं अपराह्ने अभिजीतमुहूर्तं 12:05 वादनतः 12:53 वादनपर्यन्तं भवति। अस्मिन् काले कलशस्थापनमपि कर्तुं शक्यते।कलशस्थापनं कदा भवति?

**कलशस्थानम्-** १९ मार्च, प्रातः ०६:१४ तः चैत्रनवरात्रि २०२६ २०२६ मार्च १९ दिनाङ्के गुरुवासरे आरभ्य २०२६ मार्च २७ दिनाङ्के शुक्रवासरे समाप्तं भविष्यति। इयं वर्षस्य प्रथमा नवरात्रिः अस्ति, या वसंत नवरात्रि इति अपि ज्ञायते। अस्याः नवरात्र्याः अन्तिमे दिने रामनवमी इत्यस्य पवित्रोत्सवः आचर्यते। अस्मिन् वर्षे दुर्गा देवी पालकी (palanquin) इत्यनेन आगच्छति इति विश्वासः अस्ति। शास्त्रानुसारं भगवतः सवारीं विशेषं महत्त्वं धारयति। कस्यचित् प्राकृतिकस्य सामाजिकस्य वा आह्वानस्य चिह्नम् अपि मन्यते। अतः अस्मिन् समये विशेषसतर्कता, संयमः, भक्त्या च संस्कारः करणीयः।

नवरात्रे कृष्णतिलस्य कृष्णवस्त्रस्य च दानं शुभं मन्यते। नित्यं हनुमानचालीसापाठः, बालिकापूजनः, दुर्गासप्तशतीपाठः च विशेषतया फलप्रदः भविष्यति। इति पञ्चाङ्गस्य अनुसारं चैत्रनवरात्रे २०२६ तमे वर्षे कलशस्थानस्य शुभसमयः १९ मार्च दिनाङ्के अस्ति।



# Supreme Court - वरिष्ठता-वेतनवृद्ध्योः कृते अनुबन्ध-सेवा-गणनायाः निर्देशाः यथावत्, सर्वकारस्य याचिका निरस्ता

**हिमसंस्कृतवार्ताः - शिमला।** सर्वोच्चन्यायालयेन हिमाचलप्रदेशसर्वकारेण प्रविष्टा सा विशेष-अनुमति-याचिका (SLP) निरस्ता कृता, यस्यां कर्मचारिणः अनुबन्ध-सेवा वरिष्ठतायै वार्षिक-वेतनवृद्धये च गणनाय निर्देशाः दत्ताः आसन्। अयं विषयः 'हिमाचलप्रदेशराज्यं विरुद्धं प्रियंका नागू' इति प्रकरणात् सम्बद्धः अस्ति। राज्यसर्वकारेण हिमाचल-उच्चन्यायालयस्य १६ दिसम्बर २०२४ तथा १० अक्तूबर २०२५ दिनाङ्कयोः आदेशयोः विरुद्धं एलपीए (LPA) प्रविष्टा आसीत्। सर्वोच्चन्यायालयस्य न्यायमूर्ति-विक्रमनाथ-न्यायमूर्ति-सन्दीपमेहता-महोदययोः पीठेन प्रकरणस्य श्रवणं कुर्वन् राज्यसर्वकारस्य याचिकायां विचारं कर्तुं निराकृतम्। सर्वोच्चन्यायालयेन स्वकीये आदेशे स्पष्टं कृतं यत् ते इमां विशेषयाचिकां निरस्तं कुर्वन्ति, परन्तु अस्मिन् सम्मिलिताः वैधानिकाः प्रश्नाः भविष्यस्य कृते उद्घाटिताः (Open) स्थापिताः। उल्लेखनीयं वर्तते यत् उच्चन्यायालयः उक्तप्रकरणे स्पष्टं कृतवान् आसीत् यत् यदि कस्यचित् कर्मचारिणः नियुक्तिः निर्धारित-भर्ती-पदोन्नति-नियमानुसारं कृता अस्ति, तर्हि तस्य अनुबन्ध-सेवा वरिष्ठतायै, वार्षिक-वेतनवृद्धये तथा अन्य-सेवा-लाभेभ्यः च गणनीया। एकल-पीठेन कठोरां टिप्पणीं कुर्वन् उक्तं यत् स्वीकृतपदानां रिक्ततायाः सत्यपि नियमित-नियुक्तेः स्थाने अनुबन्धे नियुक्ति-प्रदानम् एका 'शोषक-नीतिः' अस्ति। न्यायालयेन मन्यते यत् इदं केवलं वित्तीय-देयतायाः रक्षणाय तथा कर्मचारिणः तेषां वैधानिक-लाभेभ्यः वञ्चितुं एकः मार्गः अस्ति।

# केन्द्रीय ओडिशाविश्वविद्यालयस्य शुभचिन्तकः मार्गदर्शकः च साधु भद्रेशदासजी साहित्य- अकादमी पुरस्कारेण सम्मानितः







**हिमसंस्कृतवार्ताः- ओड़ीशा।** संस्कृत-भारतीयाध्ययनयोः (इण्डोलॉजी) सुप्रसिद्धाः सन्तः विद्वांसश्च, बी. ए. पी. एस. स्वामीनारायण-शोधसंस्थानम्, अक्षरधाम, नवदेहली इत्यस्य महामहोपाध्यायाः साधुभद्रेशदासपादाः, "प्रस्थानचतुष्टये ब्रह्मघोषः" इति काव्यसंग्रहग्रन्थस्य कृते साहित्य-अकादमी-पुरस्काराय चिताः। साधुः भद्रेशदासः दीर्घकालं यावत् ओड़िशा- केन्द्रीय- विश्वविद्यालयस्य मार्गदर्शकः शुभचिन्तकश्च आसीत्, विश्वविद्यालयस्य बहुषु महत्त्वपूर्णेषु उपक्रमेषु सम्बद्धः आसीत्। सद्यः एव सः फरवरीमासस्य २० दिनाङ्कादारभ्य २४ दिनाङ्कं यावत् आयोजितायां पञ्चदिवसीय- शोध- पद्धति- कार्यशालायां "शोधप्रविधिः" इत्यस्यां मुख्य- संसाधन-व्यक्तिरूपेण भागग्रहणाय, कोरापुटस्थं विश्वविद्यालयपरिसरं प्राप्तवान्। अवसरेऽस्मिन् तेन विश्वविद्यालयस्य छात्राणां कृते स्वाशीः प्रदत्तम्। स्वसंस्थया प्रकाशितानि भारतीय-दर्शनसम्बद्धानि बहुमूल्यानि पुस्तकानि उपहाररूपेण अर्पितानि। तेन संस्कृतविभागस्य "अरण्यप्रज्ञा (ARANYAPRAJÑĀ)" इति पत्रिकायाः विमोचनमपि कृतम्। संस्कृते विद्यावारिध्युपाधिप्राप्तः साधुः भद्रेशदासः राष्ट्रिय- अन्तराष्ट्रीयस्तरेषु बहूनि सम्मानानि प्राप्तवान्। तेषु विविधविश्वविद्यालयैः प्रदत्तः मानद- डी. लिट- उपाधयः, "सरस्वती सम्मानम् २०२४", गुजरातसाहित्याकादमीप्रदत्तं "वेदशास्त्र-पण्डितसम्मानम् २०२३", केंद्रीय- संस्कृत-विश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी इत्यनेन प्रदत्तं "भाष्यकार-महाचार्य-सम्मानम् २०२२", भारतीय दार्शनिकानुसंधानपरिषदा प्रदत्तं "लाइफ्टाइम अचीवमेंट अवार्ड २०२१" चेति प्रमुखानि सन्ति। शिल्पाकर्णविश्वविद्यालयः, थाईलैण्ड इत्यनेन सः "दर्शनकेशरी", "वेदान्तमार्तण्डः" इति उपाधिभ्यां सम्मानितः। कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयेनापि सः "महामहोपाध्यायः", "वेदान्तप्रकाशः" इत्युपाधिभ्यां सम्मानितः। तेन त्रिंशदधिकाः ग्रन्थाः प्रायः पञ्चाशदधिकैकशतं (१५०) शोधलेखाः लिखिताः। अष्टसंख्यकानां शोधपत्रिकाणां सम्पादनं च कुर्वन्तः सन्ति। तेन विश्वस्य विविधदेशेषु विश्वविद्यालयेषु व्याख्यानानि प्रदत्तानि, अनेकेषाम् ऑनलाइन-पाठ्यक्रमाणां च विकासः कृतः।

एतस्यां उपलब्धौ ओड़िशाकेन्द्रीयविश्वविद्यालयस्य मान्यः कुलपतिः प्रो. नरसिंहचरणपण्डामहोदयः सहर्षं प्रसंशन् आह- "अस्माकं विश्वविद्यालयेन सह एतादृशस्य महतः विदुषः सम्बन्धं प्राप्य अहमात्मानं धन्यं मन्ये। ओड़िशा- केन्द्रीय- विश्वविद्यालयस्य छात्राः एतादृशस्य विदुषः आशीः प्राप्य गौरवमनुभवन्ति। साहित्य- अकादमी- पुरस्कार- प्राप्तये तस्मै मम हार्दिक्यः शुभकामनाः। अनेन संस्कृतभाषायां जनानां रुचिः वर्धिष्यते। सः भविष्येऽपि अस्माकं विश्वविद्यालयस्य छात्राणां कृते एवं मार्गदर्शनम् आशीः च दास्यतीति आशयेऽहम्। ओडिशा- केन्द्रीय-विश्वविद्यालयः, कोरापुटम् एकः केन्द्रीय-विश्वविद्यालयः अस्ति, यस्य स्थापना २००९ तमे वर्षे संसदः अधिनियमेन ओडिशायाः केबीकेक्षेत्रे शिक्षायां समतोन्नयनाय कृता। अधुना विश्वविद्यालयेऽस्मिन् विंशतिः विभागाः सन्ति, येषु विविधैः शैक्षणिक-कार्यक्रमैः शिक्षा प्रदीयते।

# लौकिकन्यायकोशः" "कफोणिगुडन्यायः"

(१) कफोणिभागे गुडं स्थापयित्वा 'तत लेढि' इति कथ्यते चेत् तत् तु अशक्यमेव।
(२) कफोणिभागे गुडं नास्ति चेदपि तद् अस्तीति मत्वा तस्य लेहनं इति इति इदम् अर्थद्वयं अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकरः पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -११

भगवत्स्तुतिः, प्रार्थना वा भावुकमनुष्याय अत्यन्तम् अन्तस्सुखं प्रदातुं शक्नुयात्। स्तुतौ तादृशी सुखप्रदा दैविकी शक्तिः विद्यमाना अस्ति, प्रत्यक्षं फलीभूता च। प्रायः सर्वेऽपि धर्मग्रन्थाः स्तुतिपरकाः एव अवलोक्यन्ते। मनुष्यस्य दुःखमयेऽस्मिन् जगति वस्तुपदार्थादिकं न किमपि सुदृढम् आधारभूतं स्यात्। सर्वमपि परिवर्तनशीलं, क्षणभङ्गुरं, विनाशशीलञ्चैव दृश्यते। परन्तु मनुष्यस्य अन्तःकरणं सुखरूपे आधारे अवलम्बितुं सदैव इच्छति। परम् अस्यां सृष्टौ तादृशः सुखकरः आधारः कथमपि न प्राप्यते- "दुःखालयमशाश्वतम्" इति आर्षवाण्यनुसारम्। तस्मात् सृष्टिः न, अपितु अस्याः अखिलसृष्ट्याः परमः स्रष्टा, परमात्मा हि सर्वेषां मुख्याधारः भवितुमर्हति। जीवने सुखानन्दस्य प्राप्त्यर्थं सः परमात्मा हि स्तोतव्यः, प्रार्थनीयः च भवति मनुष्येण, एतदतिरिच्य मनुष्यस्य कृते नास्त्येव गतिरन्यथा। तस्मात् परमप्रभोः भगवतः स्तुतिः सदैव एवं करणीया- हे परमसखे! भगवन्! श्रीराम! श्रीकृष्ण! विष्णो! हे अच्युत! श्रीलक्ष्मीदेव्याः करकमलाभ्यां सेवितस्य भवतः चरणारविन्दस्य शरणे आगतम् एवं भयङ्करे भवसागरे निमज्जितं मां कृपया उद्धर। त्रिगुणमय्या मायारूपिण्या मृगतृष्णया यस्य बुद्धिः नितरां चपलतां गतास्ति, यस्य दशेन्द्रियाणि विषयभोगार्थम् उत्कण्ठितानि सन्ति, यः दुष्टमनुष्यैः अपमानितः स्यात्, मृतवत् स्वबुद्ध्याः कारणतः येन भगवच्छरणमपि त्यक्त्वा सांसारिकगुणानां शरणं स्वीकृतमस्ति, यः सदैव भयभीतः, कामादिषट्शत्रूणां जाले निपतितः 'त्राहि त्राहि' उच्चारयन् भ्रममाणः सः अहमेवास्मि। हे प्रभो! कालिन्द्याः प्राणनाथः त्वमसि, परन्तु तव चरणारविन्दपरागेण सर्वथा शून्योऽस्म्यहम्। मनश्शोकस्य, बुद्धिभ्रमस्य च नाशार्थं समागतः अजन्माः त्वमेवासि। तव मुखकमलस्य दर्शनाभिलाषिणं, लक्ष्म्याः करकमलाभ्यां सेवितस्य तव चरणकमलस्य शरणे आगतं मां कृपया उद्धर। कालिन्दी, रुक्मिणी, राधा, सत्यभामा, जाम्बवती इत्येतासां सुहृद् त्वम्, स्वशरणागतानां भक्तानामुपरि कृपाङ्कृत्वा तेषां भवभयाद्विमोचकः, वरदः, गोपबालानां प्रियतमः, रासस्य अधिनायकः, गोवर्धनधारी, मधुसूदनः, सर्वेश्वरः, अत्यन्तं कमनीयः, गुणाश्रयः इत्यादिभिः नानासद्गुणैः त्वं समन्वितोऽसि, त्वां प्रणमाम्यहम्। रे मनः! त्वं सर्वदा यज्ञेश्वरस्य श्रीकृष्णस्य हि भजनं कुरु। हे परमसखे! लक्ष्म्याः करकमलद्वारा सेवितस्य तव चरणारविन्दस्य शरणं प्रति आगतं मामुद्धर! हे प्रभो! मां रक्ष! मामुद्धर! इति, शम्।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्यतनी प्रथमा वार्ता एका तान्त्रिकी चिन्ता अस्ति। एकेन वणिजा नितिन-महोदयेन वित्तकोश-अनुप्रयोगानाम् अतिप्रवेश-अनुमतयः निन्दिताः। तेन वणिजा उक्तं यत् एतैः तन्त्रांशैः अस्माकं दूरभाष-यन्त्राणां सर्वाणि तथ्यानि गृहीतानि।

**नन्दिनी-** आम्, सा तान्त्रिकी चिन्ता उचिता एव। अस्मदीया सुरक्षा अस्माभिः रक्षणीया। इदानीम् अन्या वार्ता। गुरुग्रामस्य एकेन संस्थापकेन पित्रोः कृते एका नूतना सूचना दत्ता। सः वणिग्-नेता अवोचत् यत् बालकानां कृते विशालानि गृहाणि न निर्मातव्यानि। तेन बालकानां विद्यायाम् एव धनं निवेशितम्।

**काव्या-** एतत् तु सत्यम्! अद्यत्वे बालकाः सम्पूर्णे विश्वे भ्रमन्ति, अतः गृह-निर्माणं व्यर्थम् एव। अन्यच्च, भोजनालयानां विषये एका अपूर्वा वार्ता मया श्रुता। एकस्मिन् भोजनालये यन्त्र-पाचकाः स्थापिताः। एतैः यन्त्रैः पञ्च-सहस्रतः अधिकानि व्यञ्जनानि पक्वानि। मानवानां साहाय्यं विना एव यन्त्र-कटाहेन अन्नं सज्जीकृतम्।

**नन्दिनी-** अहो! यन्त्राणां पाक-कौशलं तु आश्चर्यजनकम्। यन्त्राणि पाकशालासु अपि प्रविष्टानि। अन्ते, पशूनां विषये एका सुखदा वार्ता मया पठिता। एकः बिडाल-शावकः श्वास-रोगेण वायुगोलक-सदृशः सञ्जातः। परन्तु पशु-वैद्यैः सः रोग-मुक्तः कृतः। इदानीं सः शावकः स्वस्थं जीवनं प्राप्तवान् अस्ति।

**काव्या-** तत् तु अतीव हर्षस्य विषयः। बिडाल-शावकस्य रक्षणेन मदीयं मनः सन्तुष्टम्। अद्यतनीयः वार्ता-कार्यक्रमः अत्रैव सम्पन्नः। धन्यवादः।

# भौगोलिकं वैषम्यं अस्माकं संस्कृतौ वैषम्यं न दर्शयति- डॉ. सुरेन्द्र थापा





- **विश्वविद्यालये पाण्डुलिपि-केन्द्रं स्थापयिष्यते- प्रो. शिवशङ्कर मिश्रः**
- **अर्धलक्षाधिक-पाण्डुलिपीनां प्रतिलिपयः शोधार्थिभ्यः उपलब्धाः भविष्यन्ति**

हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः। गतरविवासरे महाराजा- विक्रमादित्य- शोधपीठं तथा च महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य ज्योतिषविभागः इत्यनयोः संयुक्ततत्त्वावधाने "भारतीय- ज्योतिष- ज्ञानपरम्परायां वेध- विज्ञान- धर्म- संस्कृति" इति विषयमधिकृत्य त्रिदिवसीया अन्ताराष्ट्रीया शोधसङ्गोष्ठ्याःआयोजनम् जातम्। अस्मिन् अवसरे नेपालदेशस्य उप-मिशनप्रमुखः डॉ. सुरेन्द्रथापा मुख्यातिथिरूपेण उपस्थितः आसीत्। स्वीयोद्बोधने सः अवदत् यत् भौगोलिकसीमाः पृथक् सन्ति, किन्तु अस्माकं संस्कृतिः अस्मान् एकसूत्रेण बध्नाति। सः पाणिनि- व्याकरणस्य उल्लेखं कृत्वा अवदत् यत् नेपालदेशे अपि पाणिनिपरम्परायाः विशेषः प्रभावः अस्ति, सम्भवतः पाणिनिना तस्य ग्रन्थः तत्रैव विरचितः। सारस्वतातिथिरूपेण विश्वविद्यालयस्य पूर्वकुलगुरुः प्रो. विजयकुमार सी. जी. अवदत् यत् मध्यभारतस्य केरलस्य च ज्योतिष-पद्धत्योः भेदः दृश्यते, किन्तु तयोः मूल-सिद्धान्तेषु कश्चन भेदः नास्ति। तेन 'तन्त्र-समुच्चय' इत्यादीनां ग्रन्थानां अध्ययनस्य महत्त्वं प्रतिपादितम्, विश्वविद्यालयस्य उन्नतये शुभाशंसाः च प्रदत्ताः। कार्यपरिषद्सदस्यः श्रीगौरवधाकडः अवदत् यत् विक्रमोत्सवस्य वैश्विकपटलोपरि आयोजनं जायते। सः उक्तवान् सामाजिकविस्ताराय वर्धनाय च संस्कृतशिक्षायाः आवश्यकता वर्तते। सम्मानितातिथिः गीताञ्जलिचौरसिया अवदत् यत् अस्माकं संस्कृतेः संस्कृतभाषायाश्च संवर्धनाय अस्मान् मिलित्वा सामाजिकपटलोपरि कार्यं करणीयम् इति।

कार्यक्रमस्य अध्यक्षतां कुर्वन् माननीयः कुलगुरुः प्रो. शिवशङ्करमिश्रमहोदयः अवदत् यत् डॉ. सुरेन्द्रथापावर्यस्य उपस्थितिः विश्वविद्यालयाय गौरवस्य विषयः अस्ति। सः उक्तवान्- "प्रत्येकवर्णः स्वयमेव मन्त्रस्वरूपोऽस्ति अस्ति, तस्मात् कारणात् शक्तिसाधकः भवति।" विश्वविद्यालयस्य उन्नतिः एव परमं लक्ष्यम् इति प्रतिपाद्य सर्वान् प्रति एकीभूय कार्यं कर्तुम् आह्वानं कृतवान्। अस्मिन् कार्यक्रमे ज्ञानभारतम् संस्था द्वारा विश्वविद्यालयाय २५ पाण्डुलिपीनां प्रतिलिपयः समर्पिताः। अस्मिन् सन्दर्भे कुलगुरुणा प्रो. शिवशङ्कर-मिश्रेण उक्तं यत् विश्वविद्यालयः एतासां पाण्डुलिपीनां संरक्षणाय प्रतिबद्धः अस्ति। अतः विश्वविद्यालये मध्यभारतस्य प्रमुखं शोधकेन्द्रं स्थापयिष्यते, यत्र बहवः शोधार्थिनः आगत्य विविधेषु विषयेषु अनुसन्धानं सफलतया करिष्यन्ति। अस्मिन् अवसरे कालभैरवमन्दिरस्य मोहितचतुर्वेदीमहोदयः नीरजचतुर्वेदीमहोदयश्च एतयोः सम्मानं कुलगुरुणा कृतम्। कार्यक्रमे बहवः विद्वांसः, शोधार्थिनः, गणमान्याः च उपस्थिताः आसन्। शोधसङ्गोष्ठ्यां कायथा, नारायणा, डोंगला इत्यादि स्थानात् आगताः ज्योतिष-परम्परासम्बद्धाः जनाः तथा उज्जयिन्याः देवालयसंस्कृतिसम्बद्धाः विद्वांसः अपि सम्मानिताः। अस्मिन् सङ्गोष्ठ्याम् रशिया-नेपालदेशयोः सहितं भारतस्य द्वादशराज्येभ्यः विद्वांसः सहभागिनश्च समागताः। संगोष्ठ्याः ७५ शोधपत्रैः सह सफलतया आयोजनं सम्पन्नम्। कार्यक्रमे विश्वविद्यालयस्य सर्वे अध्यापकाः, छात्राः, शोधछात्राः च उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं डॉ.अविनाशमिश्रेण कृतं, धन्यवादज्ञापनं च वेदविभागाध्यक्षेण डॉ. संकल्पमिश्रेण ज्ञापितम्। शोधसङ्गोष्ठ्याः संयोजनं ज्योतिषविभागाध्यक्षेण डॉ. उपेन्द्रभार्गवमहोदयेन कृतम्।

# आयव्ययक-सत्रे उत्थापयिष्यन्ते ७०९ प्रश्नाः, द्वितीयचरणस्य आरम्भः; १३ उपवेशनानि भविष्यन्ति- विधानसभाध्यक्षः



**हिमसंस्कृतवार्ताः- शिमला।** एकमासस्य विरामस्य अनन्तरं हिमाचल- विधानसभायाः बजटसत्रस्य बुधवासरात् द्वितीयचरणस्य आरम्भः अभवत्। अस्मिन् सत्रे सर्वकारः ७०९ प्रश्नानाम् उत्तरं दास्यति। एतेषु ५५४ ताराङ्कित-प्रश्नाः (Starred) तथा १५५ अताराङ्कित-प्रश्नाः (Unstarred) सम्मिलिताः सन्ति। सत्रस्य प्रथमचरणे विधानसभा- सचिवालयाय १२५ प्रश्नानां सूचनाः प्राप्ताः आसन्। एवं प्रकारेण सम्पूर्ण-बजट-सत्राय सचिवालयेन आहत्य ८३४ प्रश्नाः प्राप्ताः। हिमाचल- विधानसभायाः अध्यक्षः कुलदीपसिंहपठानिया महोदयः विगतदिवसे आयोजित-पत्रकारगोष्ठ्यां इमां सूचनां दत्तवान्। सः अवदत् यत् चतुर्दश- विधानसभायाः एकादश-सत्रस्य द्वितीयचरणं बुधवासरे आरप्स्यते, यस्मिन् १३ उपवेशनानि (Sittings) भविष्यन्ति।

अध्यक्षेण सूचितं यत् अद्यापि विधानसभा- सचिवालयाय सदस्यानां प्रश्नानां ८३४ सूचनाः प्राप्ताः। एताः सर्वाः सूचनाः 'ऑनलाइन' (अङ्कीय) माध्यमेन प्राप्ताः, याः नियमानुसारं आगामिकार्यविधये सर्वकारं प्रति प्रेषिताः। नियम- ६२ अन्तर्गतं अष्ट (८) सूचनाः, नियम-१०१ अन्तर्गतं तिस्रः (३) तथा नियम-१३० अन्तर्गतं पञ्च (५) सूचनाः प्राप्ताः। विधानसभाध्यक्षः पक्ष- विपक्षयोः सदस्येभ्यः सत्रं सुचारुरूपेण चालयितुम् आग्रहं कृतवान्।

**द्वितीयचरणस्य १६ दिनानि, १३ उपवेशनानि**

विधानसभा-अध्यक्षः अवदत् यत् अस्थायी-कार्यसूच्यनुसारं १८, १९, २० मार्च दिनाङ्केषु राज्यपालस्य अभिभाषणे चर्चा भविष्यति। २० मार्च दिनाङ्के मुख्यमन्त्री अस्य उत्तरं दास्यति। २१ मार्च दिनाङ्के प्रातः मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः सदनस्य पटले वित्तीयवर्षस्य २०२६-२७ आयव्ययक- अनुमानं (Budget Estimate) प्रस्तोष्यति। २३, २४, २५ मार्च दिनाङ्केषु बजट- विषये सामान्या चर्चा भविष्यति। २७, २८, ३० मार्च दिनाङ्केषु बजट-याचनानाम् (Demands) उपरि चर्चा मतदानं च भविष्यति। ३१ मार्च दिनाङ्कः 'अ-सर्धकारी- सदस्यकार्यदिवस' रूपेण निर्धारितः अस्ति। १, २ अप्रैल दिनाङ्कयोः शासकीय- विधायीकार्यैः सह सत्रस्य समापनं भविष्यति।

## प्रश्नेषु एतासां योजनानां विषयाः सन्ति

कुलदीपपठानियामहोदयः अवदत् यत् प्रश्नानां माध्यमेन अनेकाः सूचनाः अन्विष्टाः। एतेषु मुख्याः सन्ति-

> इन्दिरा गान्धी प्यारी बहना सुख सम्मान निधिः।
> हिमाचल-बोर्ड-विद्यालयानां सीबीएसई (CBSE) बोर्डे विलयः।
> मार्गाणां सेतुनां च निर्माणं, महाविद्यालयानां स्वास्थ्यसंस्थानां च उन्नयनम्।
> विभिन्नविभागेषु रिक्तपदानाम पूरणम्।
> पर्यटनं, उद्यानम्, पेयजलापूर्तिः, मादकद्रव्याणां नियन्त्रणं तथा सौर-ऊर्जा-परिवहन-व्यवस्था।

# कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः दीक्षान्त-समारोहः सम्पन्नः



## • "कृत्रिम-बुद्धिमत्तायाः युगेऽपि संस्कृतभाषा अतीव प्रासङ्गिकी वर्तते" - प्रो. गणपति-यादवः

हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, रामटेकम्। कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य चतुर्दशः (१४) दीक्षान्त-समारोहः बुधवासरे, १८ मार्च २०२६ दिनाङ्के विश्वविद्यालयस्य रामटेक-परिसरे अतीव उत्साहेन सम्पन्नः अभवत्। अस्य भव्य-समारोहस्य अध्यक्षता विश्वविद्यालयस्य माननीय-कुलगुरुः डॉ. अतुल-वैद्य-महोदयः अकरोत्। मुख्य-अतिथि-रूपेण भारतस्य प्रख्यातः अभियान्त्रिक-वैज्ञानिकः, पद्मश्री-अलङ्कृतः प्रो. गणपति-यादव-महोदयः (पूर्वतन्-कुलगुरुः, ICT मुम्बई) उपस्थितः आसीत्। अस्मिन् मङ्गलायोजने कुलसचिवः डॉ. रोशन-अलोने, परीक्षा-नियन्त्रकः डॉ. केशव-मोहरीरः, विद्वत्-परिषदः सदस्याः सर्वेषां सङ्कायानां अधिष्ठातारः च उपस्थिताः आसन्।

## श्रीमती आशा-भालचन्द्र-पाण्डे-महोदयायै मानद-डी.लिट्. उपाधिः

विश्वविद्यालयस्य इतिहासे प्रथमतया एका महिला श्रीमती आशा-भालचन्द्र-पाण्डे महोदया 'मानद-विद्यावाचस्पति' (D.Litt.) उपाधिना अलङ्कृता। बहुभाषाविद् कवयित्री इयं मराठी-हिन्दी-संस्कृत-उर्दू-भाषासु २५ पुस्तकानां लेखिका अस्ति। साहित्यक्षेत्रे तस्याः महत्तरं योगदानं संलक्ष्य कुलगुरुणा डॉ. अतुल-वैद्य-महोदयेन इयं उपाधिः प्रदत्ता।

## दीक्षान्त-भाषणम् : ज्ञानं विज्ञानं च

मुख्य-अतिथिः प्रो. गणपति-यादवः स्वकीये उद्बोधने 'शान्ति-पाठेन' सह छात्रान् मार्गदर्शितवान्। तस्य भाषणस्य मुख्यांशाः: कृत्रिम-बुद्धिमत्ता (AI) संस्कृतं च । सः अवदत् यत् अद्यतन-सङ्गणकीय-युगे पाणिनेः अष्टाध्यायी नूतन-शोध-सम्भावनाः प्रदाति।

गीतायाः प्रासङ्गिकता: वैश्विक-सङ्घर्षेषु गीता मानसिक-अनुशासनं, नैतिकताम्, अनिश्चित-परिस्थितिषु निर्णय-क्षमतां च ददाति।

**चेतना-विज्ञानम्-:** गीतायां वर्णितः चेतनायाः स्वरूपः अद्य 'न्यूरो-साइन्स्' (Neuroscience) इत्यस्य अपि विषयः वर्तते।सः छात्रान् अवदत् यत् उच्चशिखरं प्राप्य अपि मानवीय-संवेदनाः न विस्मरन्तु, ज्ञानस्य उपयोगं समाज-कल्याणाय कुर्वन्तु।

अध्यक्षीय-भाषणे डॉ. अतुल-वैद्यः अवदत् यत् उपाधि-प्राप्तिः ज्ञानस्य अन्तः नास्ति, अपितु आरम्भः अस्ति। सः विश्वविद्यालयं 'भारतीय-ज्ञान-परम्परायाः उत्कृष्टता-केन्द्रम्' रूपेण विकसितुं सङ्कल्पं प्रकटितवान्।

## उपाधि-पदक-वितरणस्य विवरणम्

समारोहे कुलगुरुणा आहत्य १४,५६४ छात्रेभ्यः उपाधयः वितरिताः:**स्नातकोत्तर-उपाधयः-:** २,७२२ **स्नातक-उपाधयः-:** ९,४९३ **पदविका-प्रमाणपत्राणि-:** १,९८६ **मुक्त-शिक्षा-केन्द्रम्-:** ३४८ **विद्यावारिधिः (Ph.D.)-:** १४ छात्रेभ्यः **पदकानि-:** ५४ स्वर्णपदकानि तथा १३ नकद-पुरस्काराः।

## दीक्षान्त-समारोहस्य विशिष्टाः उपलब्धयः

सर्वाधिक-पदकानिः धनश्री सुभाष लोणकर (एम.ए. संस्कृतम्) महोदयायै ११ स्वर्णपदकानि तथा कुलपति-स्वर्णपदकम् अपि प्रदत्तम्। सर्वोत्तम-अष्टपैलू-विद्यार्थीः अनुज रवी मञ्चावार महोदयाय 'श्री समर्थ सद्गुरु शङ्कर महाराज रसाळ स्मृति स्वर्णपदकम्' प्राप्तम्।

*सर्वोत्तम-प्रबन्ध-पुरस्काराः* उन्मेष-रत्नाकर-बोहटे, भारत-पाण्डुरङ्ग-मिसाळ, सानिका-अवधूत-बाम, अतुल-ठाकरे, देवलपल्ली-अन्वेष च शोध-प्रबन्धाय स्वर्णपदकैः अलङ्कृताः। अस्य कार्यक्रमस्य सञ्चालनं प्रो. पराग-जोशी-महोदयेन कृतम्।

# महर्षि-महेशयोगी-वैदिक-विश्वविद्यालये जलसंरक्षणम् विषये द्विदिवसीया राष्ट्रिय-संगोष्ठी भव्यतया सञ्जाता





## वैदिकज्ञानस्य आधुनिकविज्ञानस्य च समन्वयेन भविष्यति जलसंरक्षणम् : विशेषज्ञाः

हिमसंस्कृतवार्ता, कटनी।

महर्षि-महेशयोगी-वैदिक-विश्वविद्यालये, ब्रह्मस्थान-करौन्दी-कटनी-मध्यप्रदेशे

““सतत भूजल उपयोग हेतु जल प्रबंधन – वैदिक युग से आधुनिक युग तक की यात्रा”( "Water Management for the Sustainable Groundwater Use – A Journey from Vedic Age to Modern Age”) इति विषयाधरिता द्विदिवसीया राष्ट्रिय-संगोष्ठी भव्यतया सञ्जाता।

अस्मिन् अवसरे विश्वविद्यालयस्य कुलाधिपतिना वेदविद्यामार्तण्ड- उपाधिभाजा ब्रह्मचारि-गिरीशचन्द्रवर्मणा करकमलाभ्यां स्वचालित-वातावरण-केन्द्रस्य लोकार्पणम् अपि कृतम्। एषा संगोष्ठी विश्वविद्यालयेन सह अन्ताराष्ट्रिय-जलभूवैज्ञानिक-सङ्घः” International Association of Hydrogeologists (INC-IAH) इत्यस्य संयुक्तरूपेण समायोजिता। कार्यक्रमस्य आरम्भः दीपप्रज्वलनेन गुरु-पूजनेन च अभवत्। ततोऽनन्तरं वैदिकपरम्परानुसारं वैदिकमन्त्रोच्चारणेन सह वेदपाठः सम्पन्नः। अतिथीनां पुष्पगुच्छसमर्पणेन सत्कारः कृतः।स्वागतोद्बोधने कुलगुरुः प्रो. प्रमोदकुमारवर्मावर्यः अवदत् यत् साम्प्रतं जलसंरक्षणं भूजल-प्रबन्धनं च वैश्विकसमस्यारूपेण समभिदृश्यते। अतः वैदिकज्ञानपरम्पराया आधुनिकवैज्ञानिकपद्धतीनां च समन्वय अत्यावश्यकः इति। विषयस्यास्य प्रस्तावनां कुर्वन् प्रो. बी.एस. चौधरीवर्य अवदत् यत् भारतीयवैदिकसाहित्ये जलं जीवनस्य मूलतत्त्वम् इति निरूपितम् अस्ति। तेन उक्तं यत् प्राचीनभारतीयज्ञानपरम्परायां जलसंरक्षणस्य बहवः वैज्ञानिकाः व्यवहारिकाश्च सिद्धान्ताः दृश्यन्ते, येषां आधुनिकसन्दर्भे अध्ययनम् अत्यन्तं महत्त्वपूर्णम् अस्ति।अस्मिन् कार्यक्रमे कुलाधिपतेः, कुलगुरोः तथा वरिष्ठ-जलवैज्ञानिकानां (Veteran Hydrogeologists) सम्मानः कृतः। तेषां जलसंसाधन-प्रबन्धने योगदानस्य विशेषतः उल्लेखः अपि कृतः।मुख्य-अतिथिरूपेण उपस्थितः कुलाधिपतिः वेदविद्यामार्तण्डः ब्रह्मचारिगिरीशचन्द्रवर्मामहोदयः स्वोद्बोधने अवदत् यत् भारतीयसंस्कृतौ जलं ‘आपः’ इति वदन्तः देवतुल्यं मन्यते। वैदिकग्रन्थेषु जलसंरक्षणस्य शुद्धोपयोगस्य च अनेकाः निर्देशाः दृश्यन्ते, ये अद्यापि अत्यन्तं प्रासंगिकाः सन्ति। यदि समाजः वैदिकमूल्यानि स्वीकुर्यात्, तर्हि जलसंकटस्य समाधानं सम्भवम् इति।

विशिष्टातिथिः प्रो.ए.डी. सावंतमहोदय अवदत् यत् भूजलस्य अत्यधिकदोहनं भविष्ये गम्भीरं संकटं जनयितुम् अर्हति इति। अतः वैज्ञानिकदृष्ट्या सततजलप्रबन्धनरणनीतयः विकासनीयाः इति।कार्यक्रमस्य अध्यक्षतां कुर्वन् प्रो.ए.के. सिन्हामहाशयः अवदत् यत् जलसंरक्षणं केवलं वैज्ञानिकानां वा शासनस्य वा उत्तरदायित्वं नास्ति, अपि तु समाजे प्रत्येकस्य व्यक्तेः कर्तव्यं भवति। विश्वविद्यालयाः अनुसन्धानसंस्थाश्च अस्मिन् क्षेत्रे नवाचारं शोधं च प्रोत्साहयितुम् अर्हन्ति इति।अस्मिन् अवसरे INC-IAH द्वारा विविधाः जलवैज्ञानिकाः सम्मानिताः। तथा च शोधपत्र-संकलनम् (स्मारिका), विश्वविद्यालयस्य आन्तरिक-त्रैमासिक-पत्रिका “महर्षिवैदिकस्वरः”, महर्षिविद्यामन्दिरस्य वार्षिक “ज्ञान” पत्रिका, तथा डॉ. रविचौरे (सहायक-प्राध्यापकः, महात्मा-गान्धी-चित्रकूट-ग्रामोदय-विश्वविद्यालयः) कृतं “जल चौपाल” इति पुस्तकं विमोचितम्।अन्ते प्रो.जे.पी. शुक्लेन आभार-प्रदर्शनं कृत्वा सर्वेषां अतिथीनां, शोधकर्तृणां प्रतिभागिनां च कृते धन्यवादः ज्ञापितः। कार्यक्रमस्य सुचारूरूपेण संचालनं डॉ. नेहामिश्रावर्यया कृतम्। कार्यक्रमोयं राष्ट्रगीत-राष्ट्रगानयोः सह सम्पन्नः।

अस्यां संगोष्ठ्यां देशस्य विविधविश्वविद्यालयेभ्यः अनुसन्धानसंस्थाभ्यश्च आगताः वैज्ञानिकाः, प्राध्यापकाः, शोधार्थिनः विद्यार्थिनश्च सहभागित्वं कृतवन्तः। आगामीसत्रेषु जलप्रबन्धनम्, भूजलसंरक्षणम् तथा वैदिकजलदर्शनसम्बद्धानि विविधानि शोधपत्राणि प्रस्तुतानि। इत्थं प्रकारेण द्विदिवसीया राष्ट्रिय-संगोष्ठी सुसम्पन्ना इति शम्।।